Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४९१

Title ललिता स्तव रत्नम्

Author श्री दुर्वासः

Extent १८ Age १८८३

Subject भक्तिशास्त्रं

© Dharmartha Trust JK. Digitized by eGangotri

ललितास्तवराजः

४४९१

4491

#617 Common.

F. = 17

© Dharmartha Trust JK. Digitized by eGangotri

॥श्रीगणेशायनमः॥श्रीमद्गुरुभ्योनमः॥वंदेगजेंद्रवदनंवामांकारूढवल्लभाश्लिष्टं।कुं
कुमपरागशोणंकुवलयिनीजारकोरकापीडं॥१॥सजयतिसुवर्णशैलःसकलजगच्च
क्रसंघटितमूर्त्तिः।कांचननिकुंजवाटीकंदलदमरीप्रपंचसंगीतः॥२॥हरिहयनैऽ
र्ऋतमारुतहरितामंतेष्ववस्थितंतस्य।विनुमःसानुत्रितयंहरिशौरीशविष्टपाधारं
॥३॥मध्येपुनर्मनोहररत्नरुचिस्तबकरंजितदिगंतं।उपरिचतुःशतयोजनमुत्तुंगं
शृंगपुंगवमुपासे॥४॥तत्रचतुःशतयोजनपरिणाहंदेवशिल्पिनारचितं।नानासा
लमनोज्ञंनमाम्यहंनगरमादिविद्यायाः॥५॥प्रथमंसहस्रपूर्वकषट्शतसंख्याकयो क
जनंपरितः।वलयीकृतस्वगात्रंवरणंशरणंव्रजाम्ययोरूपं॥६॥तस्योत्तरेसमीर
णयोजनदूरेतरंगितछायः।घटयतुमुदंद्वितीयोघंटास्वनसारनिर्मितःसालः

© Dharmartha Trust JK. Digitized by eGangotri

विचित्रित नयम्
॥उभयोरंतरसीमन्युद्यमभ्रमरशिंजितोदारं। उपवनमुपास्महे यद्दूरीकृतमंदमा
रुतस्पंदं॥८॥आलिंग्यभद्रकालीमासीनस्तत्र हरिशिलाश्यामां। मनसिमहाकाले
पि विहरतु मधुपानविभ्रमन्नेत्रः॥९॥ तत्तीयको वरणस्तस्योत्तरसीम्निवातयोजन
तः। ताम्रेण रचितमूर्त्तिस्तन्द्रुतामाचं द्रतारकं भद्रं॥१०॥ मध्ये तयोर्मणिमयपद्मव
शाखाप्रसूनपक्ष्मलितां। कल्यानोकहवाटीकलयेमकरंदपंकिलावालां॥११॥ तत्र म
धुमाधवश्रीतरुणीभ्यां तरलदृक्चकोराभ्यां। आलिंगितोवतान्मामनिशं प्रथम
र्त्तैरात्तपुष्पास्त्रः॥१२॥ नमत तदुत्तरभागे नाकिपथोल्लंघिशृंगसंघातं। सौसाकृति
प्रकाशे
तुरीयं सितकिरणालोकं निर्मलं सालं॥१३॥ सालद्वयांतराले सरला र्लैपोतचा
टु सुभगायां। सिंतानवाटिकायां सक्तं चेतोस्तु सततमस्माकं॥१४॥ तत्रतपनातिरू १ क

© Dharmartha Trust JK. Digitized by eGangotri

क्षः संभ्राजीचरणसंद्रितस्वांतः। शुक्लशुचिश्रीसहितोग्नीषमंतुर्दिशातु कीर्त्तिमाक
ल्यां॥१५॥ उत्तरसीमनितस्योन्नतशिखरोत्कंपिहाटकपताकः। प्रकटयतु पंचमोऽ
नः प्राकारः कुशलमारकूटमयः॥१६॥ प्राकारयोश्च मध्ये पल्लवितान्यंतपंच
मोन्मेषा। हरिचंदनद्रुवाटीहरतात्तमलमस्मदनुतापं॥१७॥ तत्र नमश्रीमुख्येस्त
रुणीवर्गैः समन्वितः परितः। वज्रोद्देहासमुखरो वांछापूर्त्तिं तनोतु वर्षर्त्तुः॥१८॥ मा
रुतयोजनदूरे महनीयस्तस्य चोत्तरे नागो। नद्धं कुरुबीष्ठः प्राकारः पंचलोहधातुमयः॥१ प॰४:
९॥ अनयोर्मध्ये संततमंकूरद्दिव्यकुसुमगंधायां। मंदारवाटिकायां मनसिमंगीक
रोतु मे विहर्त्ति॥२०॥ तस्यामभियोजेलक्ष्मीतरुणीभ्यां शरदृतुः सदा सहितः। अन्यच्चैप
न्सजीयादं बामामोदमेदुरैः कुसुमैः॥२१॥ तस्यर्षिसंख्ययोजनदूरे देदीप्यमानश्टं

© Dharmartha Trust JK. Digitized by eGangotri

ललि

ओघः कलधौतकलितमूर्त्तिः कल्याणं दिशतु सप्तमः सालः ॥२२॥ मध्ये तयोर्मेरुतल्पय
२ त लं घोविटपाग्रविघटितकलङ्कं मा श्रीपारिजातवाटीश्रियमनिशं दिशतु शीतलोद्दे
श ॥२३॥ तस्यामतिप्रियाभ्यां सह खेलन्सह सहस्यलक्ष्मीभ्यां। सामन्तोऽञ्चकेतोर्हिमं
२ तोभवत्वहेमवद्धौ नः ॥२४॥ उत्तरतस्तस्य महानुद्भटऋतुभुक्शिखारुणमयूखः तप
नीयखंडरचितस्तनुतां दायुष्मदृर्भैविरेण ॥२५॥ कादंबविपिनवाटी मनयोर्मध्य
कल्प४ मुविकल्पितावासां। स्तनैयाभिस्तनकोरककंदलितामोदतुंदिलसमीरां ॥२६॥ तद
स्यामतिशिशिराकृतिरासीनस्तपस्यतपस्यलक्ष्मीभ्यां। शिवमनिशं कुरुतान्मे शिशि
रर्त्तुः संभीततशीतलदिग्ंतः ॥२७॥ तस्यां कदंबवन्यां तत्प्रसवामोदमिलितमधुगं २
धां सप्रावरणं मनोज्ञशरणं समुपैमि मंत्रिणीशरणं ॥२८॥ तज्ज्वालये विशालेतपनी

© Dharmartha Trust JK. Digitized by eGangotri

पारचितैतर[illegible]सोपाने। माणिक्यमंडपांतर्मेहिते सिंहासने मणीखचिते॥२९॥ बिंदु
त्रिपंचकोणद्विपन्नपवसुवेददलकुरेखाढ्ये। चक्रे सदा निविष्टां षष्ट्यष्टत्रिंशदक्षरे
शानीं॥३०॥ तापिच्छमेचका[illegible]तालीदलघटितकर्णताटंकां। तांबूलपूरितमुखीं ताम्रा
धरबिंबदृष्टदरहासां॥३१॥ कुंकुमपं[illegible]किलदेहां कुवलयजीवातुशावकवतंसां। को
कनदशोणचरणां कोकिलनिक्वाणको[illegible]मलालापां॥३२॥ वामांगमिलितचूलीं
[illegible]कदंबमालिकाभरणां। मुक्तालंबितकांचितमुग्धालिकमिलितचित्रकोद
दारां॥३३॥ करविधृतकीरशावककलनिनदव्यक्तनिखिलनिगमार्थां। वामकुचसंगि
वीणावादनसौख्यार्धमी[illegible]लिताक्षियुगां॥३४॥ आपाटलांशुकधरामादिरसो
न्मेषवासितकटाक्षां। आम्नायसारगुलिकामाद्यां संगीतमातृकां वंदे॥३५॥ तस्य

© Dharmartha Trust JK. Digitized by eGangotri

नति

चस्तु वर्णसालस्योत्तरतस्तरुणकुंकुमच्छायः। शमयतु मम संतापं सालो नवमस्तु पु

ष्परागमयः॥३६॥ अमुष्योरंतरवसुधाः प्रद्युम्नः प्रत्यग्रपुष्परागमयीः। सिंहासने

पद श्वरीमेतुं चिंतननिरस्तद्रसिद्धनीरंध्राः॥३७॥ तत्सालोत्तरदेशे तरुणजपाकिरणोऽ अरुण

धोरणीशोणः। प्रशमयतु पद्मरागप्राकारो मम पराभवं दशमः॥३८॥ अंतरनकृत

अमृ वासाननयोरपनीतचित्तवैमत्योन्नरा॥ श्रीकेशीपदभक्तोश्वारणवर्णोनहर्निशंकलये

३९॥ सारंगवाहयोजनदूरे संघटितकेतनस्तस्या। गोमेदकोनरचितो गोपायतु मां

3 समुन्नतः सालः॥४०॥ वप्रद्वयांतरोर्व्यो बटुकैर्विविधैश्च योगिनीवृंदैः। सततं समर्चि

व तायाः संकर्षिण्याः प्रणौमि चरणांजौ॥४१॥ तापसयोजनदूरे तस्य समुत्तुंगगोपुरो ३

पेतः। वांछाप्रत्यैनवताद्वज्रमणीनिकरनिर्मितो वप्रः॥४२॥ वरणद्वितयांतरतो वाऽ

© Dharmartha Trust JK. Digitized by eGangotri

कुर्वंतः

सजुषो विहितमधुरसास्वादाः। रंजनादि विबुधवेश्या। रचयंतु महांतमस्मदानंदं॥४

३॥ तत्र सदा प्रवहंती तरंगिणीव ज्ञानिधा चिरंजीयात्। चंद्रलोर्मिक्रोडे नृत्यत्कलहंसी रसंघ (ममहः)

संघु कुलकलक्कणित घुष्टा॥४४॥ रोधसि तस्या रुचिरे वज्रे श्रीजयति वजनमेषा ख्याव

ज्ञप्रदानतोषितवज्रिमुखत्रिदशविनुते (स्तुत) चारित्रा॥४५॥ तस्योदीच्यां हरितिस्तव (गु)

(श्रीकृताशोभा) कु कितसुखमावलीढवियदंतः। वैडूर्यैरत्नरचितो वैमल्यं दिशतु चेतसो वरणः॥४६

॥ अधिमध्यमेतयोः पुनरंबाचरणावलंबितस्वांतान्। काकोदरादि (द्रको) नागान्कलया

मः किं च बलिमुखान्द्रनुजान्॥४७॥ गंधर्वहसंख्ययोजनदूरे गगनोर्ध्वजांघिकस्त (बरयाग)

(मनशीलः) ।ल स्या वासवमणिप्रणीतो वरणो बहुयंतु वेदुर्बी विशदां॥४८॥ मध्यक्षोण्यामनयोर्म

हेंद्रनीलात्मकानि च सरांसि। शांतोदरीसहाया न्नृपालानपि पुनः पुनः प्रणमः॥

© Dharmartha Trust JK. Digitized by eGangotri

४९॥आशुगयोजनदूरे तस्योर्ध्वं को[illegible]ति धवलितदिगंतः। मुक्ताविरचितगात्रो मुहुर
स्माकं मुदे नवतु पद्मजः॥५०॥आवत्योरधिमध्यं पूर्वस्यां दिशि पुरंदरः श्रीमान्॥अत्र
(ऐरावत उ पपति)
मुविराधिरूढो विभ्रमममस्माकमनिशमातनुतात्॥५१॥तत्कोणे व्यजनस्रुक्तोम
रपात्रस्रुवान्नशक्तिधरः। स्वाहास्वधासमेतः सुखयतु मां हव्यवाहनः सुचिरं॥५
२॥दक्षिणदिगंतराले दंडधरो नीलनीरदच्छायः। त्रिपुरापदाब्जभक्तस्तिरयतुम
मनिखिलमंहसां निकरं॥५३॥तस्योवपश्चिमायां दिशि दलितेंदीवरप्रभाश्यामः। ख
टासि (पट्ट) पट्टिशधारी खेदान पनयतु यातुधानो मे॥५४॥तस्याउत्तरदेशे धवलांगो वि
पुलझषवराढः। पाशायुधात्तपाणिः पाशी विदलयतु पापजालानि॥५५॥वंदेत ८
दुत्तरहरित्कोणे वायुं (मृग) चमूरुवरवाहं। कोरकिततत्वबोधान्गोरक्षप्रमुखयोगिमोवि

© Dharmartha Trust JK. Digitized by eGangotri

नूतन मद्यं
मुहुः॥५६॥ तरुणीरिडाप्रख्यानास्ति सो वा तस्य तत्र कृतवासाः प्रत्यग्रकापिशायनपान
नि
परिभ्रांतलोचनाः कलये॥५७॥ तद्वीकपूर्वेणागेधनदं ध्यायामि शेवधिकुलेशी॥ अ
पिमाणिभद्रमुख्यानं वाचरणावलं विनोयक्षान्॥५८॥ तस्यैव पूर्वे सीमनितपनी
पारचित गोपुरे नगरे। कात्यायनीसहायं कलये शीतांशुखंडचूडालम्॥५९॥ तत्पुर
षोडशावरणस्थलनाजस्तरुणचंद्रचूडालान्। रुद्राध्याये पठितान्रुद्राणीसहचरा
न्नजे रुद्रान्॥६०॥ पवमानसंख्ययोजनदूरे बालतृणमेचकस्तस्या। सालोमरकतर
चितः संपदमचलां श्रियं च पुष्मातु॥६१॥ आवृतियुग्मांतरतो हरितमणीनिवहमे
चकेदेशा हाटकतालीविपिनं हालामदपरितविटपमाकलये॥६२॥ तत्रैव मंत्रिणी
चंचलः वाराही
गृहपरिमाणं तरलकेतनं सदनं। मरकतसौधमनोज्ञं दद्यादायं षिदंडनाथायाः॥६

© Dharmartha Trust JK. Digitized by eGangotri

सुवर्ण
३॥सदनेतत्र हरिन्मणिसंघटिते मंडपे शतस्तंभे।कौत्ते स्वरमयपीठे कनकमयांबु
रुहकर्णिकामध्ये॥६४॥बिंदुत्रिकोणवृत्तुलषडस्त्रवृत्तद्वयान्विते चक्रे॥संचारि
कमल
णीदशोत्तरशताणिमनुराजकमलकलहंसी॥६५॥कोलवदनाकुशेशयनयना
चक्रवाकारिणा चंद्रेण
कोकारिमंडितशिखंडा॥संतप्तकांचनानासंध्यारुणचेलसंवृतनितंबा॥६६॥
परिपूर्णा
हलमुसलशंखचक्रांकुशपाशाभयवरस्फुरितहस्ता॥कुलंकषोनुकंपाकुंकुमपं
पंकिल विस्तृता शेषराव कटिभागः
जंबालितस्तनाभोगा॥६७॥घृत्तोनात्मिति दूरावाप्तौशेषावलग्नकमनीया॥आत्तो
लीश्रुनदाजीवात्तौलीनवतुवांछितार्थाय॥६८॥तस्याः परितो देवीः स्वप्नेश्युन्मद
नमैरवीनुख्याः॥प्रणमतजंभिन्याद्यानैरववर्गोश्चहेतुकप्रमुखान्॥६९॥पूर्वो ५
सूर्य
क्तसंख्ययोजनदूरे पूषाशुपाटलस्तस्या॥विद्रावयतु मदार्त्तिं विद्रुमसालोविशं

© Dharmartha Trust JK. Digitized by eGangotri

स्थल

कटद्वारः॥७०॥आवरणयोरहर्निशमुतरमस्मौप्रकाशशालिन्यां।आसीनमं
बुजासनमभिनवसिंदूरगौरमहमीडे॥७१॥वरणस्यतस्यमारुतयोजन
तोविपुलगोपुरद्वारः।सालोनानारत्नैःसंघटितांगःकृषीष्टमदभीष्टं॥७२
॥अंतरकक्ष्यामनयोरविरलशोभापिचंडिलोद्देशं।माणिक्यमंडपाख्यांमह
तीमधिहृदयमनिशमाकलये॥७३॥तत्रस्थितंप्रसन्नंतरुणितमालप्रवालंडे
किरणाभांकर्णावलंविकुंडलकंदलिताऽभीशुकवलितकपोलं॥७४॥शो
णाधरंशुचिस्मितमैणांकवदनमभेधमानकृपं।मुग्धैणमदविशेषकं
मुद्रितनिटिलेंदुरेखिकारुचिरं॥७५॥नालीकदलसहोदरनयनांचैं
संघटितमनसिजाकृतं।कमलाकठिणपयोधरकस्तूरीघुसृणपंकिलोर

© Dharmartha Trust JK. Digitized by eGangotri

जति

विद्रुमसम्भवनवरूपं

रत्नचर

र स्कं ॥७६॥ चांपेयगंधिके स्वंशं घासबन्नरत्नचारिकौशेयांश्रीवत्सकौस्तुभधरंश्रित

सेवकरक्षासमर्थपाणियुग्मं

रत्नचर जनरक्षाधुरीणं ॥७७॥ कंबुसुदर्शनविलसत्करपद्मंकंठलोलवनमालंमु

राजा०

बीज

केकुंदमोक्षफलदंमकुंदमानंदकंदमवलंबे ॥७८॥ तद्दूरणोत्तरभागेताराप

तिबिंबचुंबिनिजशृंगः ॥ विविधमणीगणघटितोवितरतुसालोविनिर्मलीधिप

णां ॥७९॥ प्राकारं द्वितयांतरकक्ष्यांपृथुरत्ननिकरसंकीर्णां ॥ नमतसहस्रस्तंभक

मंडपनाम्नातिविश्रुतांभुवने ॥८०॥ प्रणुमस्तत्रभवानीसहचरमीशानबिंदुखंड

सुंदरी

धरं ॥ शृंगारनायिकामनुशीलनभाजोपिमृंगिनंदिमुखान् ॥८१॥ तस्येणवाह

वंदे योजनदूरे दीप्रंमनोमयंवप्रं ॥ अंकुरितमणिकिरणाघांमंतरकक्षांचनिर्मलामनयोः ॥८२॥ तत्रैवामृतवापीतरलतरंगावलीढतटयुग्मां ॥ मुक्तामयकलहंसी

रत्न

© Dharmartha Trust JK. Digitized by eGangotri

शि

मुद्रितकनत्कारविंदसंदोहां [समूहं] ॥८३॥ शक्रोपलमयपत्रंगीसंगीतोन्मेषघोषितदिगंतां
।कांचनमयूरप्रियविलसत्कारंडवखंडतांडवमनोज्ञां [पक्षिसमूहः] ॥८४॥ कुरुविंदात्मक [मणिविशेषः] हल्लक [रक्तकमल]
कोरकसुषुमासमूहपाटलितां ।कलये सुधास्वरूपां कंदलितामंदकेरवामोदां [मकरंद]
॥८५॥ आतपापिकांतरालेतरलेमणिपोतकेसीम्नि विहरंतीं ।सिंदूरपाटलांगीं सितकि
रणांकुरकल्पितवतंसां ॥८६॥ पर्वेंदुबिंबवदनां पल्लवशोणाधरस्फुरितहासां ।
कुटिलकबरीं कुरंगी [हरिणी] शिशुनयनां कुंडलस्फुरितगंडां ॥८७॥ निकटस्थपोतनिल
याः शक्तीः शय [हस्त] विधृतहेमशृंग [पिचका] जलैः ।परिषिंचंतीं परितस्तारां तारुण्यगर्वितां
वंदे ॥८८॥ प्रागुक्तसंख्ययोजनदूरे प्रणमामि बुद्धिमयसालं ।अनयोरंतरकं
क्ष्यामष्टापद [सुवर्ण] पुष्ट [रत्न] मेदिनीरुचिरां ॥८९॥ कौर्द्दं [मघ] वरीनिधानां कलयाम्यानंदवाड

© Dharmartha Trust JK. Digitized by eGangotri

पिकांतस्यां।शोणाश्मनिवहनिर्मितसोपानश्रेणिशोभमानतटां॥८०॥माणिक्य
तरणिनिलयां मध्ये तस्याः मदारुणकपोलां।अमृतेश्वीत्यभिध्यानामंतःकल
यामि वारुणीं देवीं॥८१॥सोवर्णकेनिपातनहस्ताःसौंदर्यगर्विताद्देव्यः।तत्परि
तस्तरिभाजोवितरंत्वस्माकमाशिषांवृद्धिं॥८२॥तस्यपरार्धयोजनदूरेहंकार
म सालमतितुंगमं॥वंदे तयोश्चमध्येक्षांवप्रमानमलयपवमानां॥८३॥विनुमोवि ५६
मर्शवापींसौषुम्नसुधास्वरूपिणींतत्र॥वेलातिलंघिवीचीकोलाहलभरितकुं
लवनवाटीं॥८४॥तत्रैवसलिलमध्येतापिच्छदलप्रपंचसुषुमाभां।श्यामलकंचु
कलसितांश्यामा[illegible]बिंदुंवरहरास्यां॥८५॥आभुग्नमस्तकचिबुकहसितायुग्मे ८
शरकार्मुकविलासां।मंदस्मितांचितमुखींमणिमयताटंकमंडितकपोलां॥८६॥

© Dharmartha Trust JK. Digitized by eGangotri

कु नान्त

।कुरुबिंदतरश्मिनिर्लेपां कुलाचलस्पर्धिचनमन्मथ्यां कुंकुमविलिप्तगात्रीं कुरु
कुध्वां मनसि कुर्महे सततं ॥९७॥ तत्सालोत्तरभागे चिंतैमयं वप्रमाश्रयेदीप्तां मध्
ध्यं च विपुलमनयोर्मन्ये विश्रांतमातपोद्धारं ॥९८॥ तत्र कुरुबिंदपीठे तामरसे क
नककर्णिकाघटिते। आसीनमरुणवाससमम्लानप्रसवमाकामरणं ॥९९॥ लि
॥ चक्षुष्मतीप्रकाशनशक्तिछायासमारचितकेलिसद्मा माणिक्यमुकुटरम्यं
मन्ये मार्तंडभैरवं हृदये ॥१००॥ इंदुमयसालमीडे तस्योत्तरतस्तुषारगिरिगौरं
।अत्यंतशिशिरमारुतमनयोर्मध्यं च चंद्रिकोद्धारं ॥१०१॥ तत्र प्रकाशमानं तारानि
करैः परिष्कृतोद्देशं। अमृतमयकांतिकं दलमंतः कलयामि कुंदसितमिंदुं ॥२॥
श्रृंगारसालमीडे श्रृंगोध्वसिततं तदुत्तरे भागे मध्यस्थलेतयोरपि महितां श्रृंगार

© Dharmartha Trust JK. Digitized by eGangotri

परितां परिखां ॥३॥ तत्र मणिनोऽस्थितानि स्तपनीयारक्तश्लोभिहस्तानिः । शृंगार
देवतानिः सहितं परिखाधिपं भजे मदनं ॥४॥ शृंगारवरसर्वर्यस्योत्तरतः सकलवि
बुधसंसेव्यं । चिंतामणिगणरचितं चिंतां दूरीकरोतु मे सदनं ॥५॥ मणिसदनसाल
योरधिमध्यं दशतालभूमिरुहदीर्घैः । पर्णैः पयोदवर्णैर्युक्तां कांडेश्चयोजनोत्तुंगैः
१ ॥६॥ मिलितैस्तालीपंचकमानेर्मिलितां चकेसरकदंबैः । संततगलितमरंदस्रोतो
निर्यन्मिलिंदसंदोहां ॥७॥ पाटीरपवनबालकध्याटीनिर्यत्परागपिंजरि▪तां । पश्चा
द्वीन्नजामः परिमलकश्चोलपक्ष्मलोपांतां ॥८॥ देव्यवर्ष्ये पात्रधारीतस्याः पूर्वदिशि
दशकलायुक्तः । वलयितमूर्त्तिर्भगवान्वह्निः क्रोशोन्नतश्चिरं पायात् ॥९॥ तत्राध्या ६
रे ह्रदिव्यां पात्रीरूपः प्रभाकरः श्रीमान् ॥ द्वादशकलासमेतो ध्वांतं मम बहुलमांतरं भि

© Dharmartha Trust JK. Digitized by eGangotri

घात॥१०॥तस्मिंदिनेशपात्रेतरंगितामोदममृतमयमर्च्यं।चंद्रकलात्मकममृतंसं
द्रीकुर्यादमंदमानंदं॥११॥अमृतेतस्मिन्नभितोविहरंत्योविविधमणितरणिभा
जः।षोडशकलाःसुदांशोश्शोकाद्युत्तारयंतुमामनिशं॥१२॥तत्रैवविहरंतिभाजोध्यात
मुखानांचकारलेशानां।~~भवनानिशर्मलोको~~भवंतुभासास्पृह्यादिरूपिकास्ताःश
मयंत्वखिलाःकलाश्चसंतापं॥१३॥कीनाशवरुणकिन्नरराजदिगंतेषुरत्नगेहस्य
।कलिशपालितान्यजस्रंकलयं त्वायुष्यमर्च्यपात्राणि॥१४॥पात्रस्थलस्यपुरतःप
श्चारमणविधिपार्वतीशानां।भवनानिशर्मलोकेभवंतुभासाप्रदीपितजगंति॥१५
॥सदनस्यानलकोणेसततंप्रणमामिकुंडमाग्नेयं।तत्रस्थितंचवह्नितरलशिखाज
टिलमंबिकाजनकं॥१६॥तस्याशारदिशितादशरत्नपरीतंसुपर्वनवकार्द्धं।चऽ

© Dharmartha Trust JK. Digitized by eGangotri

क्रात्मकं शतांगं दशयोजनमुन्नतं ध्वजे दिव्यं॥१७॥ तत्रैव दिशि निषणं तपनीयध्वजड

परंपराश्लिष्टांबरं यमपरं च भवान्या रचयामो मनसि रत्नमयचण्डं॥१८॥ भवनस्य

स्य वायुभागे परिष्कृतो विजयवैजयंतीभिः रचय तुमुदंरथेंद्रः सन्निवेशान्

न्यासमस्तवंद्यायाः॥१९॥ रुद्रादिशि रत्नधाम्नो रुचिरपताकाप्रपंचकंचुकितं

कुमीधिहृदयमनिशं शंक्रोडास्यायाः शतांगमर्धेन्यां॥२०॥ परितो देवीधाम्नः प्र

णीतवासामनुस्वरूपिण्यः॥ कुर्वंतु रश्मिमालाकृतयः कुशलानि देवता निखि

लाः॥२१॥ प्राग्द्वारस्य भवानीधाम्नः पार्श्वद्वयीरचितवासो मातंगी किटिमुख्याऽ

मणिसदने भावयामि चिरं॥२२॥ योजनयुग लान्नोगातं क्रोशं परिखं स्याह १०

यामि त्यां॥ चिंतामणिगृहमनमिजीयादाम्नायमयचतुर्द्वाराः॥२३॥ द्वारे द्वारे

© Dharmartha Trust JK. Digitized by eGangotri

धाम्नः पिंडीभूतान् वीनबिम्बामाः॥ विदधतु विपुलां कीर्त्तिं दिव्या लोहित्यसिद्ध
योदेव्याः॥२४॥ मणिसदनस्यांतरतो महनीये रत्नवेदिकामध्ये॥ बिंदुमू
यचक्र र्ध्नि चिंत्तमीडे पीठानामुपरिविरचितावासं॥२५॥ चक्राणां सकोणानां प्र
त्रि थममधःसीमफलकवास्तव्याः। अणिमादिसिद्धयो मामवंतु देवीप्रभास्व
रूपिण्याः॥२६॥ अणिमादिसिद्धफलकस्योपरि हरिणांकखंडकृत
चूडाढ्यान्द्रं प्रक्षमलयंतु ब्राह्मीप्रमुखाश्च मातरोऽस्माकं॥२७॥ तस्योपरि म
णिफलके तारुण्योत्तुंगपीनकुचभाराः। संक्षोभिणीप्रधाना भ्रांतिं विद्रा
वयंतु दशमुद्राः॥२८॥ फलकत्रयस्वरूपे पृथुले त्रैलोक्यमोहने चक्रे। दीव्यं दे
स तु प्रकटाख्यास्तासां कर्त्री च भगवती त्रिपुरा॥२९॥ तदुपरि विपुले धिष्ण्ये त

© Dharmartha Trust JK. Digitized by eGangotri

रलदशस्तरुणकोकनदभासः कामाकर्षिणिकाद्याः कलयेद्देवीः कलाधर
शिखंडाः॥३०॥ सर्वाशापरिपूरकचक्रेस्मिन्गुप्तयोगिनीसेव्या। त्रिपुरेशी म
मदुरितं तु द्यात्कंठावलंबिमणिहारा॥३१॥ तस्योपरि मणिपीठे ताम्रांभो
रुहदलप्रभाशोणाः। ध्यायाम्यनंगकुसुमाप्रमुखादेवीश्च विधृतकूर्पा ऽ
साः॥३२॥ संक्षोभकारकेस्मिन्चक्रे श्रीत्रिपुरसुंदरी साक्षात्। गोप्त्रीगु
प्ततराणां गोपायतु मां कृपार्द्रया दृष्ट्या॥३३॥ संक्षोभिणीप्रधानाः शक्तीऽ
स्तस्योर्ध्ववलयकृतवासाः। आलोलनीलवेणीरंतः कलयामि यौवनोन्म
त्ताः॥३४॥ सौभाग्यदायकेस्मिंश्चक्रे श्रीत्रिपुरवासिनी जीयात्। शक्तीश्चऽ ११
संप्रदायाभिधाः समस्ताः प्रमोदयंत्वनिशं॥३५॥ मणिपीठोपरि तासामह

ख्या

© Dharmartha Trust JK. Digitized by eGangotri

तस्या

तिचतुर्हस्तविस्तृतेवलयेऽसंततविरचितवासाः शक्तीः कलयामि सर्वसिद्धि
प्रमुखाः॥३६॥ सर्वार्थसाधकाख्ये चक्रे मुष्मिन्समस्तफलदात्री॥ त्रिपुराश्रीर्मे
मकुशलं दिशताद्दुत्तीर्णयोगिनीसेव्या॥३७॥ तां सांनिलयस्योपरि धिष्ण्ये कौ
सुंभकंचुकमनोज्ञाः सर्वज्ञाद्या देव्यः सकलाः संपादयंतु मम कीर्त्तिम्॥३८
॥ चक्रे समस्तरक्षाकरनाम्न्यस्मिन्समस्तजनसेव्यां॥ मनसि निगर्भा सहितां
मन्ये श्रीत्रिपुरमालिनी देवीम्॥३९॥ सर्वज्ञासदनोपरि चक्रे विपुले समाक
लितगेहाः वंदे वशिनीमुख्याः शक्तीः सिंदूररेणुशोणरुचः॥४०॥ श्रीसर्वरोग
हाराख्ये चक्रे स्मिंस्त्रिपुराम्बिकां सिद्धां वंदे रहस्यनाम्नावद्याभिः शक्ति
भिः सदा सेव्यां॥४१॥ वशिनीगृहोपरि स्याद्विंशतिहस्तोन्नतेमहापीठो। श्री

© Dharmartha Trust JK. Digitized by eGangotri

मयं तु शाक्तं वंदंश स्त्राण्यस्त्राणि शैवदंपत्योः ॥४४॥ शास्त्रसद्मनोपरिष्टाद्दल
येबलवैरिरत्नसंघटिता कामेश्वरीप्रधानाः कलयेद्देवीः समस्तजनवंद्याः
॥४५॥ श्रीचक्रेत्र सर्वसिद्धिप्रदनामनि सर्व(सिद्धि)फलदात्री। त्रिपुरांबावतु सततं परापर
12 रहस्ययोगिनीसेव्या ॥४६॥ कामेश्वरीगृहोपरि वलये विविध मनुसंप्रदा
यज्ञाश्चत्वारो युगनाथा जयंतु मित्रेशपूर्वकाः गुरवः ॥४७॥ नाथभवनोपरि
४ मा ष्टान्नारत्नमयमेदुरे पीठे। कामेश्याद्यानिखिलाः कलयंतु मुदं तिथिस्वरूपि
ण्यः ॥४८॥ नित्यासदनस्योपरि तासां सर्वानंदमयनामके बिंदौ। पंचब्र
ह्माकारं मंचं प्रणमामि मणिगणाकीर्णं ॥४९॥ निर्मलमणिनिवहविरचि १२
ते घिष्ण्यो कुशलं षडंगदेव्यः कलयंत्वस्माकमुत्तरलनेत्राः ॥५०॥ सदनस्योपरि

© Dharmartha Trust JK. Digitized by eGangotri

परितोमणिमंचस्यप्रलंबमानाभियंत्रितपाशैः॥मायामयीयवनिकाममदुरितं
हरतुमेचकच्छाया॥४९॥मंचस्योपरिचंचन्मच्छीपुन्नागमालिकाभरितं॥हरि
गोपमयवितानंहरतादालस्यमनिशमस्माकं॥५०॥पर्यंकस्यंभजामःपादान्
न्विंबावुर्देदुहेमरूचः॥अजहरिरूद्रेशमयाननलासुरमारुतेशकोणस्थान्॥
५१॥फलकंसदाशिवमयंप्रणोमिसिंदूररेणुकिरणंमं॥आरक्तयोगेशानांस
दनीत्कलितंचरत्नसोपानं॥५२॥पट्टोपधानगंडुक चतुष्टयस्फुरितपाट ५
लास्तरणं॥पर्यंकोपरिघटितंपातुचिरंहंसतूलशयनंनः॥५३॥तस्योपरिनि
वसंतंतारुण्यश्रीनिषेवितंसततं॥आवंतकुध्वरक्तैकमत्तं मरीचिकापुंज
मंजुलच्छायं॥५४॥सिंदूरशोणवसनंशीतांशुस्तबकचुंबितकिरीटं॥कुंकु

© Dharmartha Trust JK. Digitized by eGangotri

मतिलकमनोज्ञं कुटिलालिकहसितकुमुदबंधुशिशुं ॥५५॥पूर्णेंदुबिंबवदनं
फुल्लसरोजातलोचनत्रितयां तरलापांगतरंगितश्रीकरांकनशास्त्रसंप्र
दायार्थं ॥५६॥मणिमयकुंडलघृष्णन्मरीचिकल्लोलमेंसलकपोलां।विद्रुम
सहोदराधरविस्रत्वरस्मितकिशोरसंचारं ॥५७॥आमोदिकुसुमशे

खरमानीलभ्रूलतायुग मनोज्ञां।वीटीसौरभवीचिद्विगुणितवक्त्रारविं
दसौरभ्यां ॥५८॥पाशांकुशेक्षुचापप्रसवशरस्फुरितकोमलकराब्जां।काड
श्मीरपंकिलांगं कामेशं मनसिकुर्महे सततं ॥५९॥तत्स्यांकमध्यविनिष
ण्णांतरुणकदंबप्रसूनकिरणाभां।शीतांशुखंडचूडां सीमंतन्यस्तसांद्रस १३
सिंदूरां ॥६०॥कुंकुमललामभास्वन्निटिलां कुटिलतरचिल्लिकायुगलां।ना

© Dharmartha Trust JK. Digitized by eGangotri

लीकतुल्यनयनांनासांचलकलितमौक्तिकाभरणां॥ ६१॥ अंकुरितमंदहासामरुणाधरकांतिविजितबिंबाभां॥ कस्तूरीकेसरीयुतकपोलसंक्रांतक

नकताटंकां॥ ६२॥ कर्पूरसांद्रवीटीकवलितवदनारविंदकमनीयां॥ कंबुसहोदरकंठप्रलंबमानाच्छमौक्तिककलापां॥ ६३॥ कल्हारदामकोमलभुजयु

गलस्फुरितरत्नकेयूरां॥ करपद्मलविलसत्कांचनमयकटकवलयसंदोहां॥ ६४॥ पाणिचतुष्टयविलसत्पाशांकुशपुंड्रचापपुष्पास्त्रां॥ रूलंकब

कुचशिखरांकुंकुमकर्दमितरत्नकूर्पासां॥ ६५॥ अणुदायादवलग्नामंबुदशोभासनाभिरोमलतां॥ माणिक्यखचितकांचीमरीचिकाक्रांतमांसलनितं

बां॥ ६६॥ सरलोरुकांडयुगलांजंघाजितकामजैत्रतूणीरामरा॥ प्रपदपरिभूत

© Dharmartha Trust JK. Digitized by eGangotri

कूर्मोपपल्लवसच्छायपदयुगमनोज्ञां॥६७॥कमलभवकंजलोचनकिरीटरत्नांशु
रंजितपदाब्जां।उन्मेस्तकानुकंपामुत्तरलोपांगपोषितानंगां॥६८॥आदिमरसा
वलंबामनिदंप्रथमौक्तिवल्लरीकलिकां।आब्रह्मकीटजननीमंतःकलयामिसुंदरी
मनिशं॥६९॥कस्तुक्षितौमदीयान्वस्तुतोतुंशिवांकवास्तव्यां।अस्तुचिरंतनसुकृ
तैःप्रस्तुतकार्योयतन्ममपुरस्तात्॥७०॥प्रभुसंमितोक्तिगम्यंपरशिवोत्संगतुंग
पर्यंकं।तेजःकिंचनदिव्यंपुरतोमेभवतुपुंड्रकोदंडं॥७१॥मधुरिमभरितशरा
संमकरंदस्यंदिमार्गणोदारं।कैरविणीविटचूडंकैवल्यायास्तुकिंचनमहो
नः॥७२॥अक्षुद्रमिक्षुचापंपरोक्षमवलग्नसीमनिव्यक्षांक्षपयतुनःक्षेमेतरदु ३१४
श्चरथप्रेमपक्ष्मलंतेजः॥७३॥भंगरुचिसंगरकरापांगंशृंगारतुंगमरुणांगं।

© Dharmartha Trust JK. Digitized by eGangotri

मंगलमनंगगुरुं मे घटयतु गंगाधरांगसंगि महः ॥१७४॥ प्रपदजितकूर्ममर्मभिदलक
रुणं मम मे रुचिनिर्मथनदेहं । श्रितममेव मे शंभोः किंचन नः शर्म नर्मनिर्मोलं ॥१७
५॥ कालकुरलालिकालिमकंदलविजितालिविध्वतमणिबालि॥ मिलतु हृदि पु
लिनजघनं वहुलितगरल्लि केलि किमपि महः ॥१७६॥ कुंकुमतिलकितमाला
कुरविंदच्छायपाटलदुकूला ॥ करुणापयोधिवेला काचन चित्ते करोतु मे लीला ॥
१७७॥ पुष्पंधयरुचिवेण्यः पुलिनाभोगत्रपाकरश्रेण्यः ॥ जीयासुरिक्षुबाण्यः काश्चन
कामारिकेलिसाक्षिण्यः ॥१७८॥ तपनीयांशुकवांसि द्राक्षामाधुर्यनास्तिकवचोंऽ
सि ॥ कतिचन शुचं महांसि क्षपयंतु कपालितोषित मनांसि ॥१७९॥ असितकचमा
यताक्षं कुसुमशरं कुलमुद्वहकूपार्द्र ॥ आदिमरसाधिदैवतमंतःकलये हरांक

© Dharmartha Trust JK. Digitized by eGangotri

ल लि

कंठद

वासिमहः॥८०॥ कर्णोपांततरंगितकटाक्षनिस्पंदद्धन्वकृपां। कामेश्वरोकनिल
यांकामपिविद्यांपुरातनींकलये॥८१॥ अरविंदकांत्यकुंतुदविलोचनद्वंद्वसुं
दरमुखेंदुध्वंद्वः कंदलमंदिरमंतःपुरमैंदुशेखरंवंदे॥८२॥ बिंबनिकुरुंब
15 मिविडंकविडंवैरेच्छायंमेवर[illegible]। कंबुगलमंहुदकाचंबिंबोकंकमपिचुं
वतुमनोमे॥८३॥ शंपाकुचिन्नरगर्हासंपादककांतिकवचितदिगंतां। सिद्धांतनि
गमानांश्रुद्धांतंकमपिशूलिनःकलये॥८४॥ उद्यद्दिनकरशोणान्नुत्पलवंधु
स्तनंधयापीडान्नाकरकलितपुंड्रचापान्कलयामिश्रुभान्कपर्दिनःप्राणान्
॥८५॥ रशनालसज्जघनयारसनाजीवातुचापभास्वरयाघ्राणपुष्करशा १५
रयाधातंचित्तंकयापिवासनया॥८६॥ सरसिजसहयुद्धदृशाशीपालतिका

© Dharmartha Trust JK. Digitized by eGangotri

सनाभिविग्रहया मासा कयापि चेतो नासाम रिशोभिवदनया भरितं ॥८७॥
नवपा— वकांभसि चयावृतया गजयानया दयापरया ध्वतया मिनीशकल
याधियाकयापि क्षतामयाहि वयं ॥८८॥ अलमलमकुसुमबाणैर बिंबशोणै
र पुंड्रकोदंडैः । अकुमुदबांधवचूडैरन्यैरिह जगति दैवतं मन्ये: ॥८९॥ कुव
लयसदृक्षनयनैः कुलगिरिकूटस्थबंधुकुचभारैः । करुणागंधिकटाक्षैः
कवचितचित्तोस्मि कतिपयैः कु[illegible]कैः ॥९०॥ नतजनसुलभायनमो नाली
कसनाभिलोचनायनमः । नंदितगिरिशायनमो महसे नवनीपपाट
लायनमः ॥९१॥ कादंबकुसुमदाम्ने कायच्छायाकरणाधरितहेम्ने । सीम्ने
चिरंतनगिरां नम्न कस्मैचिदाद्रिये प्रणतिम ॥९२॥ कुटिलकवरीभरे

© Dharmartha Trust JK. Digitized by eGangotri

16

भ्यः कुंकुमसब्रह्मचारिकिरणेभ्यः । कुलंकषस्तनेभ्यः कुंभेः प्रणतिं कुलाद्रि
कुलकेभ्यः ॥ ९३॥ कोकनदशोणवसनात्कोमलांकुरलाविजितशैवालात् । उ
त्पलसुगंधिनयनाद्दूरस्ती कुर्मोन दैवतादन्यत् ॥ ९४॥ आपाटलाधरारुणमा
नीलस्निग्धबर्बरकचानां । आम्नायजीवितानामाकृतानां हरस्य दासोस्मि ।
॥ ९५॥ पुंखितविलासहासस्फुरितासु पुराहितांकनिलयासु । मग्नं मनो म
दीयं कास्वपि कामारिजीवनाडीषु ॥ ९६॥ ललिता पातु शिरो मे ललाटमंबा
च मधुमतीरूपा । भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वंद्वं ॥ ९७॥ पाया
न्नासां बालासुभगा दंतांश्च सुंदरी जिह्वां । अधरोष्ठमादिशक्तिः चक्रेशी १६
पातु मे चिरं चिबुकं ॥ ९८॥ कामेश्वरी च कर्णौ कामाक्षी पातु गंडयोर्युगलं । शृंगा

© Dharmartha Trust JK. Digitized by eGangotri

रनायिका॥ द्वदनं सिंहासनेश्वरी वजलो॥१९९॥ स्कंदप्रसूश्च पातु स्कं
धौ बाहू च पाटलांगी मे पाणी च पद्मनिलया पायाद् निशं नखावली विजया
॥२००॥ कोदंडिनी च वक्षः कुक्षिं चाव्यात्कुलाचलतनूजा कल्याणी च वलग
ग्नं कटिं च पायात् कलाधरशिखंडा॥२०१॥ ऊरुद्वयं च पायात् उमा मृडानी च
जानुनी रक्षेतां जंघे च षोडशी मे पायात्पादौ च पाशसृणिहस्ता॥२०२॥ प्रातः
पातु परा मां मध्याह्ने पातु मणिगृहाधीशा। शर्वाण्यवतु च सायं पायाद्रात्रौ च भैर
वी साक्षात्॥२०३॥ भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिंदुगृहपीठा। श्रीविद्या
च यशो मे शीलं चाव्याच्चिरं महाराज्ञी॥२०४॥ पवनमयि पावकमयि क्षोणिमयि
गगनमयि कृपीटमयि शशिमयि रविमयि दिङ्मयि समयमयि प्राणम

© Dharmartha Trust JK. Digitized by eGangotri

ललि

यिशिवे पाहि ॥२०५॥ कालिकपालि निश्रलिनि मैर विमातं गिपंच मित्रिपुरेश्वा
न्द्विविंध्यवासिनिवालिमुवने शिपालयचिरमं ॥२०६॥ अभिनवसिंदूरा भामं
बत्वां चिंतयंति ये हृदये ।उपरिनिपतंति तेषामुत्पलनयनाकटाक्षकल्लोलाः ।
।२०७॥ वर्गीयकमिलिताभिर्वशिनीमुख्याभिरावृतां भवतीं । चिंतयतां सितव
र्णां वाचोनिर्यांत्ययत्नतो वदनात् ॥२०८॥ कनकशलाकागौरींकर्णव्यालोल
कुंडलद्वितयां । प्रहसितमुखीं च भवतीं ध्यायंतो ये त एव भूधनदाः ॥२०९
॥ शीर्षांभोरुहमध्ये शीतलपीयूषवर्षिणीं भवतीं । अनुदिनमनुचिंतयतां मनु
पुष्यं भवति पुष्कलमवन्यां ॥२१०॥ मधुरस्मितं मदारुणनयनां मातंगकुं
भवक्षोजां । चंद्रावतंसिनीं त्वां सविधे पश्यंति सुकृतिनः केचित् ॥२११॥ ज

17

२७

© Dharmartha Trust JK. Digitized by eGangotri

लिताया:स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः। प्रतिदिनमवनौ पठतां फ
लानि वक्तुं प्रगल्भते सैव॥२१९॥ इति श्रीदूर्वासाकृतं ललितास्तवरत्नं समा
प्तं॥ ॥श्रीललिताप्रदेव्यर्पणमस्तु॥ ॥लिखितमिदं काश्यां नन्दकाली समपे
पज्ञोपाख्य गौरीदत्तेन श्रीमन्महात्रिपुरसुंदरी गुरुभ्यो नमः॥ संवत्
१८८३ श्रावणकृष्णद्वरवौ समाप्तमिदं श्रीगुर्वर्पणमस्तु श्रीरस्तु॥ श्री

18 १८

ललितास्तव

२१२ श्लो० १०

© Dharmartha Trust JK. Digitized by eGangotri